E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.335

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
Devabhūmisaurabham
E-ISSN 2584-2870

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# वैदिकवाङ्मये शब्दार्थविवेचनपरम्परायाः वैज्ञानिकाभ्युच्चयः

**डॉ. विश्वेशः 'वाग्मी'**
सहाचार्यः, संस्कृतविभागः,
हेमवतीनन्दनबहुगुणागढवालविश्वविद्यालयः
श्रीनगरम् (गढवालः), उत्तराखण्डः

**सारसङ्क्षेपः (Abstract)-**

*सम्पूर्णेऽस्मिन् जगति भाषावैज्ञानिकस्याध्ययनस्य मूलस्रोतः वैदिकवाङ्मयमेव इत्यत्र नास्ति काचिद् विप्रतिपत्तिः। ऋग्वेदादिषु संहितासु वाक्तत्त्वस्य सूक्ष्मं दार्शनिकञ्च स्वरूपं प्रतिपादितम्, यत्र वाणी न केवलं सम्भाषणस्य साधनम्, अपितु ब्रह्ममयी चेतना जगदुत्पत्तेः मूलञ्चास्ति। ऋग्वेदस्य ज्ञानसूक्ते वागम्भृणीसूक्ते च भाषायाः उत्पत्तेः, शुद्धतायाः, अर्थबोधस्य महिम्नः तथा वाचश्चतुर्विधानां रूपाणां (परा-पश्यन्ती-मध्यमा-वैखरी) गभीरा वैज्ञानिकी च मीमांसा प्राप्यते। वेदेषु प्रादुर्भूता एषा शब्दार्थचिन्तनस्य बीजशक्ति एव उत्तरवर्तिषु ब्राह्मण-उपनिषद्-प्रातिशाख्य-निरुक्तादिग्रन्थेषु सुविकसिता अभवत्। विशेषतः आचार्ययास्कस्य 'निरुक्ते' पदवर्गीकरणं (नामाख्यातोपसर्गनिपाताः) व्युत्पत्तिविज्ञानञ्च तथा शौनकस्य 'बृहद्देवतायाम्' अर्थविज्ञानस्य विवेचनं भारतीयशब्दार्थविमर्शस्य परां काष्ठाम् उपस्थापयति। एषा प्राचीना भारतीयशब्दार्थपरम्परा आधुनिकेभ्यः भाषावैज्ञानिकप्रस्थानेभ्योऽपि अतिशयिता सुदृढा च सिद्ध्यति।*

**सूचकशब्दाः (Keywords)-**

शब्दार्थविमर्शः, वाक्तत्त्वम्, वैदिकवाङ्मयम्, ऋग्वेदः, ज्ञानसूक्तम्, निरुक्तम्, आचार्ययास्कः, अर्थविज्ञानम्, भाषाविज्ञानम्।

भारतीयज्ञानपरम्परायाः प्रायशः सर्वेष्वनुशासनेषु आदिकालादेव भाषाचिन्तनस्य महनीया सुविस्तृता च विचारश्रृङ्खला दरीदृश्यते। भाषाध्ययनस्येयं प्राचीनभारतीयपरम्परा **शब्दार्थविमर्श** इति नाम्ना व्यवहर्तुं शक्यते। शब्दार्थौ पुरस्कृत्य यावत्सूक्ष्मं गभीरञ्च विवेचनं प्राचीनकाले भारतभूभागे समजनि तावदाधुनिकेषु भाषावैज्ञानिकप्रस्थानेष्वपि अद्यावधि न समाससाद। सम्पूर्णं पाश्चात्यं भाषावैज्ञानिकमध्ययनं केवलं 200 वर्षपूर्वमेव समारब्धम्, यत्र सर्वप्रथमं सरविलियमजोन्समहाभागः संस्कृतभाषायाः अध्ययनकाले एव संस्कृतस्य लैटिन-ग्रीक भाषाभ्यां सह साम्यं प्राकाशयत् एतासाञ्च तुलनात्मकस्याध्ययनस्य शुभारम्भमकरोत्।[1] सरविलियमजोन्समहाभागेन आरब्धमध्ययनमेव अद्य विकसितं भूत्वा आधुनिकभाषाविज्ञानरूपे प्रसिद्धिमवाप।[2] संस्कृतभाषामधिकृत्य तेनोपस्थापितं प्रसिद्धं समीक्षणमेव आधुनिकतुलनात्मकभाषाविज्ञानस्य मूलम्- "The Sanskrit Language, whatever may be its antiquity, is of a wonderful structure; more perfect than the Greek, more copious than the Latin, and more exquisitely refined than either; yet bearing to both of them a stranger affinity, both in the roots of verbs and in the forms of grammar, then could have been produced by accident; so strong that no philologer could examine the Sanskrit, Greek and Latin without believing them to have sprung from some common source, which perhaps, no longer exists. There is a similar reason, though the Celtic had the same origin with the Sanskrit".

यदा च भारतीयज्ञान-विज्ञानानां मूलस्रोतो वैदिकवाङ्मयं शब्दार्थचिन्तनस्याप्युत्समिति नास्ति काचिद्विप्रतिपत्तिः। शब्दार्थविमर्शस्यारम्भो प्राचीनतमस्य ऋग्वेदस्य **वाक्-तत्त्व**विवेचनेनैव समजायत।[3] यद्यपि वेदेषु शब्दार्थचिन्तनं प्रमुखप्रतिपाद्यरूपेण न आसीत्, तथापि तत्र सा बीजशक्तिः अवर्तत या स्वोत्तरवर्तिषु ब्राह्मण-उपनिषद्-प्रातिशाख्य-निरुक्त-स्मृति-पुराण-महाकाव्येषु सञ्चरन्ती, सांख्य-योग-मीमांसा-वेदान्त-न्याय-वैशेषिक-व्याकरणादिशास्त्रेषु पूर्णदार्शनिकरूपे विकासमलभत।

---

[1] Quoted by R. H. Robins: *A Short History of Linguistics*, p. 134.

[2] *भाषा विज्ञान एवं भाषा शास्त्र*, पृ. 4

[3] *भाषाविज्ञान की भारतीय परम्परा और पाणिनि*, पृ. 14

वैदिकसंहितासु शब्दमतिरिच्य **वागिति** शब्दस्य प्रयोगो उपलभ्यते।[4] वैदिकैः ऋषिभिः **वाक्** स्थूलसूक्ष्मरूपाभ्यामुभयथापि गृह्यते, स्थूलरूपेण **वाग्** भाषायाः प्रतिनिधित्वं शास्ति, सूक्ष्मरूपेण चेयं ब्रह्ममयी चितिः सत्त्वञ्चेति- **वाक्-तत्त्वरूपमेव चितिक्रियारूपमित्यन्ये।**[5] ऋग्वेदे सुसंस्कृता भाषा **वाक्,** विकृतभाषा **विवाक्,** अस्पष्टा च **मृध्रवाक्** इति नाम्ना सम्बोध्यते।[6] सर्वादौ ऋग्वेदे एव वाक्-तत्त्वस्य स्वरूपविषये उच्यते–

**चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश।।**[7]

यास्काभिमतेनात्र यज्ञपुरुषस्य महादेवस्य वर्णनं विद्यते, किन्तु आचार्यभर्तृहरेरनुसारं वाचः स्वरूपमेवात्र प्रकाशितम्।[8] महर्षिपतञ्जलिरपि महाभाष्यस्य प्रथमाह्निके उपर्युक्तस्य मन्त्रस्य व्याख्यायां वाचः बाह्यस्वरूपमेव रूपकमाध्यमेन स्पष्टयन्नाह – **चत्वारि शृङ्गाणि- चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयोऽस्य पादाः - त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे- द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त हस्तासो अस्य- सप्त विभक्तयः। त्रिधा बद्धः - त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति।।**[9]

वेदेषु वाचोऽसकृत् ब्रह्मत्वं ब्रह्मरूपत्वं वा प्रतिपादितम्। ऋग्वेदे उच्यते यत् – स्वयं ब्रह्म एव वाचोराश्रयं परमस्थानञ्च विद्यते- **पृच्छामि वाचः परमं व्योम, ब्रह्मायं वाचः परमं व्योम।**[10] अन्येषु च बहुषु मन्त्रेषु तस्य ब्रह्मरूपत्वं प्रख्यायते। ऋग्वेदस्य प्रसिद्धे वागम्भृणीसूक्ते वाचः सृष्टेर्मूलत्वं ख्यापितमुक्तञ्च– वाक्तत्वमेव सर्वेषां तत्त्वानां पोषकं, धारकं संहारकञ्च विद्यते। तेनैवास्य अखिलस्य जगतः उत्पत्तिः क्रियते। तदेव तद्दिव्यज्योतिः यद्मानवम् ऋषिं देवतां विद्वांसञ्च साधयति-

**अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।**

**यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्।।**

**अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ।**

---

[4] *ऋग्वेदः*- 1.40.6,1.164.34-35,8.76.12,10.81.7; *यजुर्वेदः*- 6.14, 8.45, 13.58; *अथर्ववेदः*- 19.9.3

[5] *वाक्यपदीयम्, वृत्तिः*- 1.117

[6] *ऋग्वेदः*- 1.40.6, 6.31.1, 7.18.13

[7] *ऋग्वेदः*- 4.58.3

[8] *वाक्यपदीयम्, वृत्तिः*- 1.121

[9] *महाभाष्यम्, प्रथमो भागः*, पृ. 28

[10] *ऋग्वेदः*- 1.164.34-35

**अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश॥**

**अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे।**

**ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि।।**[11]

ऋग्वेदस्यैवान्यस्मिन् मन्त्रे उच्यते यद्वाक्तत्त्वमेव सर्वासु दिक्षु उपदिक्षु वा जीवनं सञ्चारयति। तेनैव तदक्षरं क्षरति येनाक्षरतत्त्वेन समस्तस्यास्य जगत्प्रपञ्चस्याविर्भावो भवति-

**तस्याः समुद्रा अधि विक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः।**

**ततः क्षरत्यक्षरं तद्विश्वमुप जीवति।।**[12]

शब्दार्थविवेचनदृष्ट्या ऋग्वेदस्य प्रसिद्धं ज्ञानसूक्तम् (10.71) अत्यन्तं महत्त्वपूर्णं विद्यते। प्रस्तुतसूक्तस्य द्रष्टा ऋषिः आङ्गिरसः बृहस्पतिः देवता च ज्ञानं विद्यते। आचार्यशौनकेन बृहद्देवतायां सूक्तस्यास्य महत्त्वं प्रतिपादयता ख्यापितम्-

**यज्ज्योतिः परमं ब्रह्म यद्योगात्समुपाश्नुते।**

**तज्ज्ञानमभि तुष्टाव सूक्तेनाथ बृहस्पति॥**

अत्र ऋषिणा भाषायाः उत्पत्तिः, तद्द्वारा पदार्थानां ज्ञानम्, भाषायाः शुद्धता अर्थस्य च महिमादिविषयेषु बहुधा परिचिन्तितम्। शब्दः मूलतः ज्ञानात्मकः इच्छात्मको वा भवति। वक्तुः विवक्षा एव नादरूपे विपरिणमन् हृत्कण्ठताल्वादिस्थानसंयोगाच्छब्दत्वेनाभिव्यज्यते। प्रस्फुटितायां तस्यां वाचि विदितवेदार्थानां निर्मलधियां ज्ञानगुहायां वाग्देव्या पदार्थानां नामकरणप्रेरणा समुत्पादिता। ज्ञानसूक्ते एषा एव वाक् प्रथमा वागुच्यते-

**बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः।**

**यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः।।**[13]

यजुर्वेदे वाचः विश्वकर्मारूपत्वमुक्तम्- **वागेव विश्वकर्माऽर्षिः।**[14] अथर्ववेदेऽपि वाचः ब्रह्मरूपे परमस्थाने च स्थितिः स्वीक्रियते, तस्या चैवोभयोरपि दैव्यासुरिसृष्ट्योरादिकारणता गृह्यते, सैव च परमेष्ठिनः प्रजापतेश्च नाम्ना सम्बोध्यते-

---

[11] *ऋग्वेदः*- 10.125.5-7

[12] *ऋग्वेदः*- 1.164.42

[13] *ऋग्वेदः*- 10.71.1

**इयं सा परमेष्ठिनी वाग् देवी ब्रह्मसंशिता।**

**ययैव ससृजे घोरं तयैव शान्तिरस्तु नः।।**[15]

एवमेव ब्राह्मणग्रन्थेष्वपि वाण्याः ब्रह्मरूपता प्रतिपाद्यते[16]। उपनिषत्सु तु ब्रह्मणः अपरं नामधेयम् **अक्षरम्** एवास्ति। कैवल्योपनिषदि अक्षरतत्त्वमेव ब्रह्म उच्यते। शिवेन्द्राग्न्यादीनि सर्वाणि विशेषणानि तस्यैव ब्रह्मणः स्वरूपभूतानि सन्ति। तदेव भूतं भविष्यं वर्तमानञ्च विद्यते**- स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्। स एव विष्णुः स प्राणः स कालोऽग्नि स चन्द्रमा।। -स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्।**[17]

वस्तुतः वेदेषु प्रादुर्भूतस्य शब्दब्रह्मेति सिद्धान्तस्योपबृंहणमुपनिषत्स्वेवाभूत्। छान्दोग्योपनिषदि देवर्षिनारदाय उपदिशता सनत्कुमारेण वाचः महिमानं ख्यापयतोच्यते– **यद्वै वाङ्नाम विषयन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वाग्वै तत्सर्वं विज्ञापयन्ति, वाचमुपासस्वेति। स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति।।** यदि सृष्टौ वाक्तत्त्वं नाभविष्यत्तर्हि धर्माधर्मयोरुभयोरपि व्यवस्था नावर्तिष्यत। न च केवलमेतदेव अपितु सत्यासत्ये, साध्वसाधू, सहृदयासहृदयौ, चिन्तज्ञाचिन्तज्ञावपि व्यवस्थितौ न स्याताम्। यः साधकप्रवरः अस्य वाक्-तत्त्वस्योपासनां विदधाति स एव एतं तत्त्वं साधयति।[18]

पुरुषे वाक्तत्त्वमेव रसरूपेण विद्यते इति छान्दोग्योपनिषदः कथनम्। तस्य वाक्-तत्त्वस्य रसः ऋग्वेदः, ऋग्वेदस्य रसः सामवेदः सामवेदस्य चोद्गीथ इति ओमित्यक्षरमेव समुपास्यं वर्तते- **ओमित्येतदक्षरमुद्गीथमुपासीत। पुरुषस्य वाग्रसो वाच ऋग् रस ऋचः साम रसः साम्नः उद्गीथो रसः।।**[19] वाग्विधानामप्युल्लेखो प्राथम्येन ऋग्वेदे एव आयाति-

**चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।**

**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।**[20]

---

[14] *यजुर्वेदः*- 13.58

[15] *अथर्ववेदः*- 19.9.3

[16] वाग्ब्रह्म। *गोपथब्राह्मणम्*- 2.10; वाग्वै ब्रह्म, वाग्वै ब्रह्म च सुब्रह्म चेति। *ऐतरेयब्राह्मणम्*- 6.3; *शतपथब्राह्मणम्*- 2.1.4.10

[17] *कैवल्योपनिषद्*- 1.8.9

[18] *छान्दोग्योपनिषद्*- 7.1-2

[19] *छान्दोग्योपनिषद्*- 1.1-2

[20] *ऋग्वेदः*- 1.164.45; *अथर्ववेदः*- 9.10.27

मन्त्रोऽयं विपश्चिद्भिः भाषाविज्ञानस्य बीजत्वेनाभिमन्यते। अत्रेयं वाणी चतुर्धा विभज्यते- परा, पश्यन्ती, मध्यमा, वैखरीरूपेण। तत्राद्यास्तिस्रो अव्यक्ता सन्ति, चतुर्था चैव व्यक्ता भवति, सा एव वैखरीरूपा मनुष्यैः व्यवह्रियत इति। अस्मिन् रूपे वाण्याः चतुर्थांशमेव ज्ञानविषयं सम्भाव्यते। यास्क-पतञ्जलि-भर्तृहरि-नागेशप्रभृतयो नैके आचार्याः अनया दृष्ट्या एव उपर्युक्तस्यास्य मन्त्रस्य विविधं व्याख्यानं चक्रुः।

वैदिकवाङ्मये भाषाध्ययनक्षेत्रे प्रातिशाख्यानामपि महत्त्वपूर्णं स्थानं विद्यते। प्रातिशाख्येषु ध्वनिविज्ञानस्य सैद्धान्तिकं प्रायोगिकञ्चोभयविधं विवेचनमुपलभ्यते। वस्तुत एतानि शिक्षाग्रन्थेषु प्रतिपादितस्य सैद्धान्तिकध्वनिविज्ञानस्यैव व्यावहारिकं विश्लेषणं कुर्वन्ति। वेदानां विभिन्नाभिः शाखाभिः सह सम्बद्धत्वादेतानि प्रातिशाख्यान्युच्यन्ते- **शाखां शाखां प्रति प्रतिशाखं प्रतिशाखं भवं प्रातिशाख्यमिति।**[21]

एतर्हि वैदिकर्षिभिः वाचः स्वरूपमधिकृत्य बहुधा बहुविधं चिन्तितम्, तैर्न केवलं वाक्स्वरूपमेव अपितु तस्यात्मभूतमर्थमपि विशेषेण विमृष्टम्। आचार्यपतञ्जलिनाप्युच्यते- **अर्थगत्यर्थः शब्दप्रयोगः**[22] अर्थात् भाषोत्पत्तिः अर्थस्य सूक्ष्माभिव्यक्त्यै एव। अतएव वैदिकवाङ्मये शब्दविमर्शेण सह अर्थस्यापि अनेकविधं वैज्ञानिकं चिन्तनमभूत्। यथा वाक् (शब्द) विमर्शस्य मूलं वैदिक-वाङ्मयं स्वीक्रियते तथैव अर्थविमर्शस्यापि। ऋग्वेदस्य ज्ञानसूक्ते अर्थस्य उपयोगिता-दुर्बोधता-अनिवार्यतानाञ्चापि सूक्ष्ममीमांसा प्रस्तूयते। तत्रोच्यते-'योऽर्थज्ञानरहितः स वाणीं पश्यन्नपि न पश्यति, श्रृण्वन्नपि न श्रृणोति। किन्तु योऽर्थग्राही, तं प्रति एषा वाक् स्वात्मानं तथैव विवृणुते, यथा शोभनवसना कामयमाना सती स्वपतिं प्रति-

**उत त्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम्।**

**उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः।।**[23]

यो हि शब्दम्, अर्थम्, तयोश्चाभिसम्बन्धं सम्यग्जानाति, स एव वाग्योग्विद् वेदार्थामृतं समश्नुते। परं यः खलु शब्दम्, अर्थम्, तयोश्चाभिसम्बन्धमेव न वेत्ति, तस्य कृते तु एषा छन्दस्वती वाग् जीविताापि मृतप्राया अर्थात् निष्प्रयोजना। सः ज्ञानराशिं दृष्ट्वा श्रुत्वा वा किमप्यधिगन्तुं न शक्नोति-

**उत त्वं सख्ये स्थिरपीतमाहुः नैनं हिन्वन्त्यपि वाजिनेषु।**

**अधेन्वाचरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्।।**[24]

---

[21] अव्ययीभावाच्च। *अष्टाध्यायीसूत्रपाठः*- 4.3.59

[22] *महाभाष्यम्*- 1.1.44

[23] *ऋग्वेदः*- 10.71.4

ज्ञानसूक्ते ऋषिः निर्दिशति यत्- सर्वदैव शुद्धभाषायाः प्रयोगः कार्यः। यथा शूर्पद्वारा सक्तोः कर्कटांशान् शोधयित्वा सुखावहः प्रयोगः क्रियते तद्वदेव प्रकृति-प्रत्ययादियोगरीत्या वाङ्मलान् सम्मार्ज्य भाषायाः प्रयोगो विधेयः। तथा विहिते सति भाषातत्त्वज्ञाः विद्वांसः सख्यभावं निर्वहन्तः वाक्याभ्युदयपूर्वकं भद्रलक्ष्म्याः सान्निध्यं प्राप्नुवन्ति-

**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।**

**अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि।।**[25]

ऋग्वेदे उक्तम्- योऽर्थविहीनः तस्मै ऋचो निष्फला भवन्ति[26] इति। सन्दर्भेऽस्मिन् यास्काचार्यस्य श्लोकद्वयं बहुशः उद्ध्रियते- यथा अग्निं विना शुष्केन्धनमपि न प्रज्ज्वलति, तथैव अर्थज्ञानं विनैव यदि शब्दोच्चारणङ्क्रियते तर्हि तद् कदापि अभीप्सितं कमपि विषयं न प्रकाशयति। यः अर्थावबोधं विना वेदाध्ययनं करोति, सः केवलं भारं वहति-

**यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते।**

**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।**

**स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।**

**योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।।**[27]

ऐतरेयारण्यकस्यावतरणिकायां नवमे मन्त्रे अर्थतत्त्वस्य वाग्रसत्वं ज्ञापितम्- **सर्वस्यै वाच ईशाना चारु मामिह वादयेदिति वाग्रसः।**[28] गोपथब्राह्मणं शब्दसामान्यादर्थसामान्यं श्रेष्ठं मनुते- **रूपसामान्यादर्थसामान्यं नेदीयः।**[29] शौनकोऽपि अर्थापेक्षया शब्दतत्त्वं गौणं मन्यते कथयति च- **प्रधानमर्थः शब्दस्तु तद्गुणाधीन एव।**[30] वस्तुतः अर्थचिन्तनस्येयं परम्परा ऋग्वेदादेवारब्धा, तस्या एव विकासः कालान्तरेण निरुक्ते समभवत्, यश्च शब्दार्थचिन्तनस्य क्रमबद्धपरम्परायाः प्राचीनतमो ग्रन्थ इत्याख्यायते। निरुक्तं व्युत्पत्त्यर्थविज्ञानयोः मूलं विद्यते।

---

[24] *ऋग्वेदः*- 10.71.5

[25] *ऋग्वेदः*- 10.71.2

[26] यस्तन्न वेद किमृचा करिष्यति। *ऋग्वेदः*- 1.164.39**;** *निरुक्तम्*- 13.10

[27] *निरुक्तम्*- 1.18

[28] *ऐतरेयारण्यकम्*- 3.2.5

[29] *गोपथब्राह्मणम्*- 1.1.26

[30] प्रधानमर्थः शब्दो हि तद्गुणायत्त इष्यते। *बृहद्देवता*- 2.99

संसारे व्युत्पत्तिविज्ञानस्य एतस्मात्प्राचीनतरं किमपि पुस्तकं नोपलभ्यते।[31] निरुक्तस्य परिभाषायां दुर्गाचार्येण तस्य पञ्चविधं प्रतिपाद्यं निरूप्यते- वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णनाशः, धातूनाञ्च अर्थविस्तर इति-

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।**

**धातोस्तदर्थातिशयेन योगस्तदुच्यते, पञ्चविधं निरुक्तम्।।**[32]

एतेषु ध्वनि-पद-अर्थविज्ञानानि[33] भाषाचिन्तनेन सह साक्षात्सम्बद्धानि सन्ति। निरुक्तकारः भाषायाः चतुर्विधं विभाजनं करोति- नाम (संज्ञा), क्रिया, उपसर्गः, पूर्वसर्गश्च (निपातश्च)।[34] तत्र नाम्नः परिभाषा स्थिरपदरूपेण क्रियायाश्च सक्रियसत्तारूपेण क्रियते।[35] अस्याः परिभाषायाः दूरङ्गमः प्रभावः शब्दार्थदर्शनस्य विकासे समभवत्। आचार्ययास्केन प्रस्तुतमेतद् वर्गीकरणं प्रायशः सर्वैरपि दर्शनकारैः स्वीक्रियते। भारतीय-शब्दार्थविमर्शं प्रति आचार्ययास्कस्यैतत् अप्रतिमं योगदानं विद्यते। इत्येवम् आचार्ययास्केन अर्थातिशय-अर्थविकास-अर्थभेद-पदार्थ-वाक्यार्थ-नामार्थ-आख्यातार्थ-अर्थबोधादिषु विषयेषु विशिष्टं गभीरञ्च चिन्तनं प्रस्तूयते।

अर्थचिन्तनस्यैतस्यां वैदिकपरम्परायां निरुक्तादनन्तरं **बृहद्देवतायाः** महत्त्वपूर्णं स्थानं विद्यते। शौनकः शब्दानां निर्वचनमेवार्थविज्ञानस्याधारं मनुते। शौनकाभिमतः अर्थविचारः सा ज्ञानसरणिः, या शब्दार्थानां क्रियापरकतां विवेचयन्ती मानसबिम्बं समुपस्थापयति। अर्थविज्ञानेति शब्दस्य प्रयोगोऽपि इदम्प्रथमतया शौनकेनैव विधीयते बृहद्देवतायाम्।[36] निरुक्त-बृहद्देवता-प्रातिशाख्यसदृशान् ग्रन्थानवलोक्यैव प्राच्यार्वाच्यैर्विद्वद्भिः सर्वैरपि स्वीकृतं यद् शब्दार्थविमर्शक्षेत्रे वैदिकवाङ्मयस्य स्थानं निश्चयेन सम्मानार्हं विद्यते।[37]

## सन्दर्भग्रन्थसूची-

1. *अथर्ववेदसंहिता*, सम्पादकः- स्वामी जगदीश्वरानन्द सरस्वती, वेदज्योति प्रेस, दिल्ली, 2004

---

[31] अत्र प्रायशः 1298 शब्दानां व्युत्पत्तिः क्रियते।

[32] *निरुक्तम्*, पृ. 3

[33] शब्दानां निर्वचनेषु अर्थस्य महत्त्वं यास्केनैव प्रथमं प्रदर्शितम्- **अर्थनित्यः परीक्षेत।** *निरुक्तम्*- 2.1

[34] तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च। *निरुक्तम्*- 1.1

[35] भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि। *निरुक्तम्*- 1.1

[36] वेदतत्त्वार्थविज्ञानं प्रायेणात्र हि दृश्यते। *बृहद्देवता*- 7.110

[37] M. B. Emeneau, *Meaning of Meaning*, p. 795.

2. *अष्टाध्यायीसूत्रपाठः*, पाणिनिः, सं. पं. ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, बहालगढ़, सोनीपत, हरियाणा, 1998
3. *ऐतरेयब्राह्मणम्*, नागप्रकाशन, जवाहरनगर, दिल्ली, 1991
4. *ऋग्वेदसंहिता*, सं. स्वामी जगदीश्वरानन्द सरस्वती, वेदज्योति प्रेस, दिल्ली, 2003
5. *कैवल्योपनिषद्*, श्रीसदाशिवाचार्यः, शिवभारती शोध प्रतिष्ठानम्, वाराणसी, 2006
6. *गोपथब्राह्मणभाष्यम्*, भा. पं. क्षेमकरणदासत्रिवेदी, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, 1993
7. *छान्दोग्योपनिषद्*, (शाङ्करभाष्यसहितम्), गीताप्रेस, गोरखपुर, उत्तर प्रदेश, सम्वत्- 2076
8. *निरुक्तम्*, यास्कः, सं. छज्जूरामशास्त्री, मेहरचन्द लछमनदास,दिल्ली, 1973
9. *बृहद्देवता*, शौनकः, सं. ए.ए. मैक्डोनल, मोतिलाल बनारसीदास, दिल्ली, 1965
10. *भाषाविज्ञान एवं भाषा-शास्त्र*, डॉ. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी, 2012
11. *भाषाविज्ञान की भारतीय परम्परा और पाणिनि*, डॉ. रामदेव त्रिपाठी, बिहार राष्ट्रभाषा परिषद्, पटना, 1997
12. *महाभाष्यम्*, पतञ्जलिः, व्या. युधिष्ठिरो मीमांसकः, रामलाल कपूर ट्रस्ट, बहालगढ़, सोनीपत, हरियाणा, 1992
13. *यजुर्वेदसंहिता*, सं. स्वामी जगदीश्वरानन्द सरस्वती, वेदज्योति प्रेस, दिल्ली, 2018
14. *वाक्यपदीयम्*, भर्तृहरिः, सं. व्या. डॉ. शिवशङ्कर अवस्थी, चौखम्बा विद्याभवन, वाराणसी, 2006
15. *शतपथब्राह्मणम्*, भाष्यकारः- स्वामी समर्पणानन्द सरस्वती, स्वामी समर्पणानन्द वैदिक शोध संस्थान, मेरठ, 1995
16. Ogden, C.K., & Richards, I.A., *The Meaning of Meaning, A Study of the Influence of Language upon Thought and the Science of Symbolism* (10th Ed.), London, 1960.
17. Robins, R. H., *A Short History of Linguistics*, Indiana University Press Bloomington and London, (Third Printing), 1972.